रेणुकास्तोत्रं श्रीवासुदेवानन्दसरस्वतीकृतम्

{॥ रेणुकास्तोत्रं श्रीवासुदेवानन्दसरस्वतीकृतम् ॥}

श्रीगणेशाय नमः ।

ऐन्द्यादिवन्दितपते वरदेऽभीष्टकामदे ।

कामदेवर्चितेऽनन्ते रेणुकेऽम्ब नमोऽस्तु ते ॥

एकवीरे निजाधारे रुचिरे सज्जनादरे ।

उदरे रेणुसञ्जाते रेणुकेऽम्ब नमोऽस्तु ते ॥

करुणारससम्पूर्णे नयने सुस्मिताननें ।

शोभने पाहि नो भीते रेणुकेऽम्ब नमोऽस्तु ते ॥

वीरमातर्महादेवी त्वदन्या का परा भुवि ।

तारिणीदुर्गतोऽनन्ते रेणुकेऽम्ब नमोऽस्तु ते ॥

राममातर्महामाये जमदग्निप्रियाऽभये ।

विजये वेदविनुते रेणुकेऽम्ब नमोऽस्तु ते ॥

यैरर्चिते तव पदे ते धन्याः परमे पदे ।

निहितास्ते सुरनुते रेणुकेऽम्ब नमोऽस्तु ते ॥

न त्वदन्यागतिर्देवि परमा खलु शाम्भवि ।

भुक्तिमुक्तिप्रदे शान्ते रेणुकेऽम्ब नमोऽस्तु ते ॥

यः केशवेश्वरश्चापि सृष्टि-स्थित्यन्तकारिणः ।

प्रसादादेव तेऽनन्ते रेणुकेऽम्ब नमोऽस्तु ते ॥

जगदम्बे नमोऽस्तु रेणुके परिपाहीश्वरि नः सुभावुके ।

जय-लाभ-यशःप्रदे मुदे स्तुतिरेषास्तु तवाखिलार्थदे ॥

नावाहनं नार्चन पद्धतिं ते

जाने न भक्तिं त्वयि मे भवान्तके ।

अथापि मां त्वं कुलदेविभक्तं

कुलोद्भवं पाह्यपि चार्थसक्तम् ॥

मातापुरनिवासिन्याः श्रीदेव्याः स्तोत्रमुत्तमम् ।

यः पठेत्प्रयतो भक्त्या सर्वान् कामान् स आप्नुयात् ॥

इति श्रीवासुदेवानन्दसरस्वतीपण्डितविरचितं श्रीरेणुकास्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ृ्oday

http://sanskritdocuments.org

Renuka Stotram 6 (By Vasudevanand Saraswati) Lyrics in Devanagari PDF
% File name : reNukAstotramvAsudevAnanda2.itx
% Location : doc_devii
% Author : Vasudevananda Saraswati
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Description-comments : First one is reNukAstotrammAtApuravAsinI
% Latest update : June 18, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website